**अथर्ववित्** पु० अथर्ववेदं तदुक्तं कर्म्म वा वेत्ति विद्–क्विप् । अथर्ववेदस्य "शन्नो देवीरभीष्टय" इत्यादिकस्य, तद्विहिताभिचारादिकर्म्मणश्च वेत्तरि वशिष्ठादौ । "गुरुणाऽथर्वविदा कृतक्रिय" इति रघुः ।

**अथर्ववेद** पु० कर्म० । वेदभेदे तद्विवृतिः "अथर्वस्य नव शाखाः, पैप्पलादा शौनकी दामोदा औप्ता ब्रह्मदा पशशौनकी देवदर्शी चारणविद्या चेति तेषामध्ययनं द्वादशैव सहस्राणि तस्य पञ्च कल्पा भवन्ति कल्पे कल्पे पञ्च शतानि भवन्ति नक्षत्रकल्पो, विधानकल्पः संहिताविधिकल्पः, अभिचारकल्पः, शान्तिकल्पश्चेति" चरणव्यूहोक्ता । तस्याध्ययनप्रचारभेदादि विष्णुपुराणेऽभिहितं यथा "अथर्वाणामथो वक्ष्ये संहितानां समुच्चयम् । अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः ॥ शिष्यमध्यापयामास कवन्धं सोऽपि तद् द्विधा । कृत्वा तु देवदर्शाय तथा पथ्याय दत्तवान् ॥ देवदर्शस्य शिष्यास्तु मौद्गो ब्रह्मबलिस्तथा । शौल्कायनिः पिप्पलादस्तथान्यो मुनिसत्तम ! ॥ पथ्यस्यापि त्रयः शिष्याः कृता यैर्द्विज ! संहिताः । जाजलिः कुमुदादिश्च तृतीयः शौनको द्विजः ॥ शौनकस्तु द्विधा कृत्वा ददावेकान्तु बभ्रवे । द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने ॥ सैन्धवमुञ्जकेशाभ्यां भिन्ना वेदा द्विधा पुनः । नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥ चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः । श्रेष्ठास्त्वथर्वणामेते संहितानां हि कल्पकाः इति" ॥ एतस्य उपनिषदः एकत्रिंशत् तासां नामानि यथा प्रश्नः १ मुण्डकं २ माण्डूक्यम् ३ अथर्वशिरः ४ अथर्वशिखा ५ बृहज्जावालिः ६ नृसिंहतापनी ७ नारदपरिव्राजकः ८ सीता ९ शरभः १० नारायणः ११ रामरहस्यम् १२ रामतापनी १३ शाण्डिल्यः १४ परमहंसपरिव्राजकः १५ अन्नपूर्णा १६ सूर्य्यात्मा १७ पाशुपतम् १८ परब्रह्म १९ त्रिपुरातापनी २० देवी २१ भावना २२ भस्म २३ जावालिः २४ गणपतिः २५ महावाक्यम् २६ गोपालतापनी २७ कृष्णतापनी २८ हयग्रीवः २९ दत्तात्रेयः ३० गरुड़ः ३१ एताश्च प्रायशः ब्रह्मविद्यातदङ्गोपासनाप्रतिपादिकाः मुक्तिको० ।

**अथर्वशिखा** स्त्री अथर्वणः वेदस्य शिखेव ब्रह्मविद्याप्रतिपादकत्वेन श्रेष्ठत्वात् । तद्वेदीये ब्रह्मप्रतिपादके तन्नामके उपनिषद्भेदे । [श्रेष्ठत्वात् स्वनामख्याते अथर्व्वोपनिषद्भेदे ।

**अथर्वशिरस्** न० अथर्वणः शिरइव ब्रह्मविद्याप्रतिपादकतया

**अथर्वाङ्गिरस** पु० अथर्वा चाङ्गिराश्च नि० अच् । एतयोर्मुन्योः । उपचारात् तद्दृष्टमन्त्रादिभेदे च "अथर्वाङ्गिरसं नीलरुद्रं देव्यपराजितेति" तन्त्र । "अथर्वाणं पितरं देवबन्धुं मातृगर्भं पितुरसुं युवानम् ॥ यइमं यज्ञं मनसा चिकेत प्रणो वोचस्तमिहेह ब्रुवः इति" । "अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः । तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ अङ्गिरोभिर्यज्ञियैरागहीह यम वैरूपैरिह मादयस्व । विवस्वन्तं हुवे यः पिता तेऽस्मिन् वर्हिष्या निषद्य ॥ इमं यम प्रस्तरमा हि रोहाङ्गिरोभिः संविदानः । आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषो मादयस्व ॥ इतएत उदारुहन् दिवस्पृष्टान्यारुहन् । प्रभूर्ज्जयो यथा पथा द्यामङ्गिरसो ययुरिति" सूक्तञ्च ॥ अथ० १८,१,५८,६१, [वेदराडित्युक्ते" बुधे ।

**अथर्वाधिप** पु० ६त० । "सामवेदाधिपो भौमः शशिजोऽथर्व-

**अथर्वी** स्त्री न+थुर्व अच् पृ० उलोपः गौ० ङीष् । अहिंसिकायाम् "याभिर्विश्पलां धनसामथर्व्यमिति" वेदः ।

**अथवा** अव्य० अथेति वायते अथ+वा–का । पक्षान्तरे "अथ वा कृतवाग्द्वारे इति" "अथवा मृदु वस्तु हिंसितुमिति" च रघुः । "अथ वा हेतुमन्निष्ठविरहाप्रतियोगिनेति" भाषा० ।

**अथो** अव्य० अर्थ–डो पृषो० रलोपः । अथशब्दार्थे आरम्भादौ । "अथाथो संशये स्यातामधिकारे च मङ्गले विकल्पानन्तर प्रश्नकात्स्न्यारम्भसमुच्चये इत्युक्ते" अथशब्दार्थे ।

**अद** बन्धने भ्वा० पर० इदित् सक० सेट् । अन्दति आन्दीत् ।

**अद** भक्षणे च अदा० पर० सक० अनिट् । अत्ति अघसत् जघास अत्ता अत्स्यति । सनि जिघत्सति । क्त–ओदनार्थे अन्नम् अन्यत्र जग्धम् घञ् घसः–आदः क्तिन् जग्धिः । "योऽन्नमत्ति यतस्तत" इति स्मृतिः । "अत्ता चराचरग्रहणादिति" शा० सू० । "किमदन्ति भृङ्गा" इति ।

**अदंष्ट्र** पु० नास्ति दंष्ट्रा दशनसाधनदन्तविशेषः यस्य । भग्नाशीदन्ते सर्पे । प्रधानदन्तरहिते त्रि० ।

**अदक्ष** त्रि० विरोधार्थे न० त० । दक्षत्वविरोधिमान्द्यवति ।

**अदक्षिण** त्रि० दक्षिणोऽनुकूलः कुशलश्च विरोधार्थे न० त० । दक्षिणत्वविरुद्धनैपुण्यप्रतिकूलत्ववति, वामाङ्गे च । नास्ति दक्षिणा कर्म्मसमाप्तौ देया यत्र । दक्षिणाशून्ये यज्ञादौ । दक्षिणादानस्य नित्यत्वं दक्षिणाशब्दे वक्ष्यते "हतयज्ञमदक्षिणमिति" ।

**अदग्ध** त्रि० शास्त्रविधिनाग्निना न दग्धः । शास्त्रविधिना-